# Roman Transcription

१. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः।।

**yā sr̥ṣṭiḥ sraṣṭur ādyā vahati vidhi-hutaṁ yā havir yā ca hotrī**
**ye dve kālaṁ vidhattaḥ śruti-viṣaya-guṇā yā sthitā vyāpya viśvam|**
**yām āhuḥ sarva-bīja-prakr̥tir iti yayā prāṇinaḥ prāṇavantaḥ**
**pratyakṣābhiḥ prapannas tanubhir avatu vas tābhir aṣṭābhir īśaḥ||**

२. आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।

**ā paritoṣād viduṣāṁ na sādhu manye prayoga-vijñānam|**
**balavad api śikṣitānām ātmany apratyayaṁ cetaḥ||**

३.मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोद्ध्र्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः।।

**mukteṣu raśmiṣu nirāyata-pūrva-kāyā**

**niṣkampa-cāmara-śikhā nibhr̥torddhva-karṇāḥ|**

**ātmoddhatair api rajobhir alaṅghanīyā**

**dhāvanty amī mr̥gajavākṣamayeva rathyāḥ||**

४.मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः।।

**medaścheda-kr̥śodaraṁ laghu bhavaty utthāna-yogyaṁ vapuḥ**

**sattvānām api lakṣyate vikr̥timaccittaṁ bhaya-krodhayoḥ|**

**utkarṣaḥ sa ca dhanvināṁ yad iṣavaḥ sidhyanti lakṣye cale**

**mithyaiva vyasanaṁ vadanti mrgayām īdr̥g vinodaḥ kutaḥ||**

यण्–संधिः

इको यणचि (इकः यण् अचि)

इक्= इ, उ, ऋ, ऌ

यण्= य्, व्, र्, ल्

अच्= स्वरवर्णाः

इ>य्

उ> व्

ऋ> र्

ऌ > ल

आत्मनि+अप्रत्ययम्=आत्मन्+इ(इक्)+अ(अच्)प्रत्ययम्=

आत्मन्+य्(यण्)+अप्रत्ययम्= आत्मन्यप्रत्ययम्

आत्मन्य् अप्रत्ययम्

कुरु+अन्वेषणम्= कुर्+उ (इक्)+अ(अच्)न्वेषणम्= कुर्+व्(यण्)+अन्वेषणम्= कुर्वन्वेषणम्

कुर्व् अन्वेषणम्